Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 1 | ISSN : 2582-0095

# ज्योतिषे भृत्यसुखविचारः



**डॉ० धर्मानन्दठाकुरः**
**ग्रा० + पो० -सरिसब–पाही, थाना-पण्डौल**
**जिला-मधुबनी, बिहार, भारत।**

**सारांशः** - लोके वेदे च ज्योतिषशास्त्रस्य महत्त्वपूर्णं स्थानं विद्यते। तत्र मानवहिताय अनेके सुखाः वर्णिताः सन्ति। तेष्वत्र प्रामुख्येन भृत्यसुखयोगस्य विचारः कृतो विद्यते।

**प्रमुखशब्दाः** - ज्योतिषम्, भृत्यसुखः, वर्णव्यवस्था, भौमः, सूर्यः, शनिः, कर्मजीवः, वराहमिहिरः

---

जातकत्वे भृत्यसुखविचारमते दासन्वितयोगस्य चर्चा अनेन रूपेण प्राप्यते–

**षष्ठेशे माने रवेशेन्दयुते केन्द्रदासान्वितः।**

**राज्ये शुभदृष्ट्यामिक्ये दासान्वितः।।**[1]

अर्थात् षष्ठेशः दशम भावे एवञ्च दशमेशः शनिग्रहेण युक्तो भूत्वा केन्द्रतो भवति तदा मानवः दास दासान्यूतो भवति। दशमभावस्य यदि शुभग्रहेण दृष्टिसम्बन्धो भवति तदा अनेकेभ्यः दासेभ्यः युक्तो भवन्ति।

पुनः ग्रन्थकारः भृत्यसुखसम्बन्धे कथ्यति–

**कर्मेशांशेशे मन्दे षष्ठपसम्बन्धो बहुदासान्वितः।**

**नृपेऽर्के शुभकर्मपदृष्टे बहुदासान्वितः।।**[2]

अर्थात् दशमाधिपति नवांशेशः, शनि एवञ्च षष्ठेशः–द्वयोर्ममये यदि सम्बन्धो भवति तदा मानवः बहुदासान्वितजो भवन्ति। एवञ्च शुभाग्रहः दशमेशेन दृष्टः सूर्यः यदि दशमभावगतो तदा जातकः बहुदासान्वितो भवति।

वैदिककालाद् आरभ्य भारतेऽस्मिन् वर्णव्यवस्था प्रसरिष्यति। वर्ण–शब्देन किम् अभिप्रेतम्, इति जिज्ञासायां वर्णो वृणोतेः। मानवः स्वजीवननिर्वाहार्थ यां कामपि वृत्तिम् आश्रयते, तदनुसारमेव तस्य वर्णनिर्णयः। प्रवृत्तिवैविमयम् अनुरुमय मानवशरीरसमालोचनपूर्वकं चातुर्वर्ण्यव्यवस्था प्रवर्तिता। तदेवाभिप्रेत्य ऋग्वेदे यजुर्वेदेऽथर्ववेद गीतायां च चातुर्वर्ण्यम् उल्लिख्यते–

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**

**उरु तदस्यशुद्रोयद् वैश्यः पद्भ्यांशुद्र अजायत।।**[3]

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**

**तस्य कर्तारमपि मां विद्धियकर्तारमव्ययम्।।**[4]

वर्णव्यवस्था परीक्ष्यते चेद् गीताया वचनमेतत् समर्थयते यत् चातुर्वर्ण्य गुणकर्मानुसारमेव प्रवृत्तम्। विभाजनस्य किं कारणम्? क आभार इत्यनुयोगे प्रोच्यते यद् मानवेषु उपलभ्यन्ते। तनमूलकमेव प्रवृत्तिवैविमयम्। प्रवृत्तिभेदाच्च वृत्तिभेदाः। वृत्तिभेदाच्च वर्णभेदः। वर्णभेदाच्च वैभिन्नत्वम्। अतएव गीतायां निगद्यते–

**ब्राह्मणक्षत्रियविशांशुद्रणां च परन्तप।**

**कर्मणि प्रवभिकतानि स्वभावप्रभवैर्गुणैः।।**[5]

वर्णव्यवस्था परिलक्ष्यते चेत् सा गुणकर्मानुसारं प्रावर्तते। यः कश्चन तत् कर्म कुर्यात् स तं वर्णम् आश्रयेत्। स्वकर्मणैव ब्राह्मणो वैश्यत्वंशुद्रत्वं चापथत। एवमेव सत्कर्माण्यनुरुमपयशुद्रपि ब्राह्मणत्वं प्रपदे। नहि वर्णव्यवस्था जन्मानुसारिणी कर्ममूला च। अतएव मनुना कर्मानुसारं वर्णविपर्यये निर्दिश्यते–

**शूद्रं ब्राह्मणतामेति ब्राह्मणश्चैत्यशुद्रताम्।**

**क्षत्रियाज्जातमेवं तु विद्याद् वैश्यात् तथैव च।।**[6]

भृश्रृत्यकार्यम् मुख्यतया शुद्रस्य विद्यते वा शुद्रस्य कर्तव्यम् विद्यते।शुद्रस्यं शिल्पकार्यम्, **सर्वेषां वर्णानां च शुश्रूषण कर्तव्यम्**

**अभिमीयते-**

**एकमेव तु शूस्यं प्रभुः कर्म समादिशत्।**

**सर्वेषामेव वर्णानां शुश्रूषामनसूव्या।।**

**परिचर्यात्मकं कर्म भृस्यापि स्वभावजम्।।**[7]

एवमत्र प्रायः ग्रन्थान्तरेषु फलोपपादेन समानता भजते परन्तु निर्माणतत्त्वानि अन्तरितानि सन्ति। यतो हि अत्र कारकग्रहवशादेव सर्वफलं वर्णितमस्ति। अत्र राहोः आजीविकापि प्रतिपादिता वर्तते। आजीविकाविचारे न केवलं कारकनवाशपयोः एव महत्त्वं सर्वाधिकं प्रतिपादित वर्तते अपितु ग्रहयोगवशादपि जातस्य वृत्तिर्माणं विद्यते। तद्यथा जातकपरिजाते–

**चन्द्रत्कर्मगते रवौ सरुमिरे मनः परस्त्रीरतो।**

**ज्योतिर्विच्च सचन्जे जलमानस्त्रीभूषणादिप्रियः।।**[8]

**सुगन्मानीलचूर्णादिचित्रकारो भिषक् वणिक्।**

**कर्मस्थानगते मन्सासुरेज्ये निशाकरात्।।**[9]

यद्यपि आधुनिक युगे बहवः भृत्तयः सञ्जायन्ते परन्तु यदि शोमादृष्ट्या विचार्यते तर्हि मूले पूर्वोक्तं तथ्यं सन्दृश्यते। एवमत्र फलादेशप्रभावकारक-तन्वेषु वराहमिहिरोतजातिकुलदेशानाम् अन्तर्भावः स्वयमेवोपपद्यते। जातिरेव प्रसूतिः एवञ्च वीर्यकुलं तथा च क्षेत्रं देशेषु अन्तर्निहिताः दृश्यन्ते। उपर्युक्तानां प्रभावकारकतन्वानां यदिदं कारणमन्वेष्यते तर्हि मुख्यरूपेण कर्म एवोत्पद्यते। कर्मफलविशेषेण जातक सुख-दुःखात्मकस्य जीवनस्य ज्ञापनं करोति। कर्मएव भाग्यरूपेण परिवर्तने। यथोक्तम्

**पूर्वजन्मार्जितकर्म तदैवमिति कथ्यते।**[10]

परन्तु कर्मनिर्माणेपि प्रायः शास्त्रविहितः कर्म एव शास्त्रकारैः प्रतिपादितः। धर्मेण यः आचरति स एव कर्मणि कुशलः जायते। इदं ज्योतिषशास्त्रं पापिनाम् अर्थात् पापकर्मनिरतानां छते नास्तीति, स अपितु मामिष्ठ-जनानां छते वर्तते। अन्यथा कर्मच्युते भ्रष्टे च पूर्णफलादेशस्य कल्पना एव न कर्तुं शक्यते कोऽपि जनः। योक्तं श्रीपतिना-

**स्याणर्मिष्ठ-सुशील-पथ्यसुभुजा न स्यादिदं पापिनाम्।**[11]

भुत्यसुखस्य साक्षात् सम्बन्धाः आजीविकाया विद्यते। ज्योतिषशास्त्रे आजीविकाविचारः अनेन रूपेण प्राप्यते। मया प्रसंगवशात् आजीविका विचारः अत्र प्रस्तूयते-

जातकस्याजीविकयाः निर्माणम आधुनिक युगे ज्योतिषशास्त्रस्य परमोपादेयता दैवज्ञैः सामान्यजनैश्च मन्यते। यतो हि जातकस्य वृत्तिनिर्माणं यदि पूर्वमेव भवति तदा सजातकः तस्मिन् क्षेत्रे कार्ये व्यापारे वा समन्वित मनसा सन्नदमातां करोति तथा च स जातकः अल्पेनैव कालेन सफलीभूतः सन् अर्थार्जनं च करोति।

ज्योतिषशास्त्रस्य अद्यजातकग्रन्थबृहज्जातके आचार्यवराहमिहिरेण 'कर्मजीव' नामाध्यायः वर्णितः, तत्र ग्रहाधारेण जातकस्य कर्मक्षेत्रनिर्माणं तत्सम्बन्धित योग्यतायाः परिगणना च सौलभ्येन प्राप्यते। तत्रोक्तं यत् आजीविकाविचारः कृतः विद्यते, कः भावः तस्य कारकः तथा कः ग्रहः वृत्तिनिर्माणे महत्त्वपूर्णः इति। यथा-

**होरेन्द्वोर्दशमगर्तर्विकल्पनीय भेन्तार्कास्पदपतिगांसनाथवृनया।।**[12]

प्रसंगेण्ऽस्मिन् आचार्यभट्टोत्पलेन प्रोक्तम् अनेन पुरुषेण कथं मान-मर्जयितव्यमित्यममाये निरुप्यते। अत्र च प्रकारद्वयेन मानदाता ग्रहो भवति लग्नाच्चन्भावाच्च, यो दशमस्थो ग्रहः स मानदाता भवति। अथ लग्न-चद्रन्योर्दशमस्थाने शून्ये भवतस्तदालग्नचद्रदित्यानां ये ये दशमराशयस्तेषां येणमिपतयस्ते येषु नवांशकेषु पुरुषस्य जन्मकाले स्थितास्तेषां नवांशकानां ये ग्रहाः अमिपतयस्ते ग्रहाः मानदातारो भवन्ति। किन्तु लग्नाच्चनच्च ये दशमस्थग्रहाः ते अनेन प्रकारेण मानदातारो भवन्ति।

एवमेव वर्णनम् आचार्यमन्त्रेश्वरेण फलदीपिकायां प्रतिपादितम् अस्ति। तत्रोक्तं कर्मजीवभेदामयाये यत्-

**अर्थाप्तिं कथयेद्विलग्नशशिनो प्राबल्यतः खेचरैः**

**दिननालिग्नशशिनां ममये बलीयांस्ततः।**

**कर्मेशस्थनवांशराशिपवशावृत्ति जगुस्तद्विदः।।**[13]

अनेन प्रकारेण आजीविकानिर्माणे प्रायः सर्वत्रैव मतैक्यं सन्दृश्यते। नात्र किमपि विपरीतलक्षणं परिभाषा च प्राप्यते। यद्यपि जैमिनीयसूत्रे पृथग् विचारा: वर्तते, परन्तु तत्रापि इदमेव वैशिष्ट्यं प्रतिपादितं वर्तते।

अतोऽत्र निर्मारितमसित यत् प्रकारद्वयेन मानदाता ग्रहो भवति, तत्राद्य लग्नात् अपरो चन्द्रवंशात् च। तत्र उभयो: ममये यो नूनं बलवान् तस्य यो ददशम: स एवार्थप्रदो भवति। तत्र यदि सूर्यादिग्रहेषु ये ग्रहा: बलवन्त: भवन्ति, तदा विमर्श: सूर्यादिग्रहेण पित्रयादिवशाद् मानलाभो भवति। तद्यथा–

**सूर्यः - पितृणा**

**चन्द्रः - मातृणा**

**भौमः- शत्रुणा**

**बुधः - मित्रेण**

**गुरुः भ्रातृणा**

**शुक्रः - भार्यया**

**शनिः - भृत्येन**

एवमत्र प्राय: सर्वेऽस्मिन् ग्रन्थे पूर्वमानदातृग्राहणां निर्माणं तद्वशत् पित्र्यादीनां निर्माणं वर्णितमस्ति, ततः जातकस्य जीविकाया: विचार: प्रवर्तते। तत्र वृत्तिनिर्माण विषये प्रोक्तं यत्–सूर्य–शशि लग्नेषु य: बली, ततः दशमस्थानवशाराशिवशात् वृत्तिं जानीयात्। भट्टोत्पलेन टीकायाम् आचार्यगर्गस्य वचनमुदाहृतम्। तद्यथा–

**उदयाच्छशिनो वापि ये ग्रहादशमस्थिताः।**

**ते सर्वेऽर्थप्रदा ज्ञेया स्वदशासु यथोदिताः॥**

**लग्नार्करात्रिनाथेभ्यो दशमामिपतिग्रहः ।**

**यस्मिन्नशे तत्कालं वर्तते तस्य यः पतिः॥**

**तद्वृन्या प्रवदेद्विनं जातस्य बहवो यदा।**

**भवन्ति विनदास्तेऽपि स्वदशासु विनिश्चितम्॥**[14]

वस्तुतस्तु समेषां ग्रहाणां सम्बन्धितं पृथक्–पृथक् कार्यव्यापारादिकं वा निश्चितं वर्तते, ज्योतिषशास्त्रे फलप्रदायक: ग्रहा एव भवन्ति। ग्रहामीनं फलं भवति, अतोऽत्र क: ग्रह: एतादृश: अस्तीति विचार्यते। तत्रोक्तं–रवि चन्द्र–लग्नेषु य: बली ग्रह: ततः दशमस्थनवांशपतिवशात् वृति विचारणीयं भवति। तत्र यदि सूर्यादिग्रहा: नवांशपतय: भवन्ति तदा निम्नलिखितवृत्तय: भवन्ति।

नवांशपतिसूर्येण तृण–कनक–भेषजाद्यैः, मातुव्याधि, क्षितिपालपूज्यात् मन्त्रजपैश्च जीवति जातकः ।

चन्द्रेण– जलोद्भवेन, छषिव्या, गोमहिषीसमुत्थैः, अगना–भयाच्च जातकः जीवति।

भौमेन– मात्वाग्निसाहसैः, भूमिवशात्, स आयुषो, सूचक–चोरवृत्या च जातकः जीवनं यापयति।

बुधेन– लिपिगणितादिकाव्यशिल्पैः, लेखकज्योतिषगणितज्ञानेन, पुरोहितकुसीदवाशाच्च जातकः वृतिं गृह्णति।

गुरुणा– द्विजविबुमाकारादिमार्गे, पुराणशास्त्रागमनीतिमार्गमार्मोपदेशेन, स कुसीदवृत्या च जीवति।

शुक्रेण– मणिरजतादिगोमहिष्यैः, स्त्रीसंश्रयात, रजतैः. गम्नौ, अमात्यगुणैः, कवित्वात् अलंकारैश्च जीवति।

शनिना– श्रमवमा–भारनीचशिल्पैः, मूलफलैः, खलैर्नीचमानैः, कुमान्यैः कुत्सितमार्गवृत्या, शिल्पादिभिश्च जातकः जीवति।

जैमिनीयसूत्रे आत्मकारकस्य नवांशवशात् वृत्तिनिर्माणं विद्यते। एवमत्र प्रथमाऽध्यायस्य द्वितीयपादस्य चतुर्थदशसूत्रदारभ्य विंशतिसूत्रं यावद् बहूनि सूत्राणि वृतिनिर्माणकराणि विलासितानि सन्ति। तद्यथा–

**तत्र रवौ राजकार्यपरः, पूर्णेन्दुशुव्योर्भोगी विद्याजीवि च**

**मातुवादी कौनतायुमो वम्जिीवी च भौमे।**

**वणिजस्तनुवायाः, शिल्पिनो, व्यवहारविदश्च सौम्ये।**

**कर्मज्ञाननिष्ठा वेदविश्च जीवेम राजकीयाः कामिनः शतेन्याय शुवे प्रसिण्कर्माजीवः शनौ।**

**मनुष्यकारश्चौराश्च जाज्वलिका लोहयन्त्रिणः राहौ।।**[15]

एवमत्र प्रायः ग्रन्थान्तरेषु फलोपपादने समानता भजते परन्तु निर्माणतत्त्वानि अन्तरितानि सन्ति। यतो हि अत्र कारकग्रहवशादेव सर्वफलं वर्णितमस्ति। अत्र राहोः आजीविकापि प्रतिपादिता वर्तते। आजीविकाविचारे न केवलं कारक–नवांशयोः एव महत्त्वं सर्वाधिकं प्रतिपादितं वर्तते अपितु ग्रहयोगवशादपि जातस्य वृत्तिनिर्माणं विद्यते। तद्यथा जातकपरिजाते–

**चन्द्रात्कर्मगते रवौ सरूमिरे मनः परस्त्रीरतो।**

**ज्योतिर्विच्च सचन्जे सजमानस्त्रीभूषणादिप्रियः।।**

**सुगन्मानीलचूर्णादिचित्रकारो भिषक् वणिक्।**

**कर्मस्थानगते मन्दे सासूरेज्ये निशाकरात्।।**

यद्यपि आधुनिकुयगे बहवः वृत्तयः सञ्जायन्ते परन्तु यदि शोमादृष्ट्याविचार्यते तर्हि मूले पूर्वोक्तं तथ्यं सदृश्यते। यान्त्रिकी चिकित्सा वैज्ञानिकक्षेत्रेभ्यः या काऽपि वृनिः समुत्पन्ना दृश्यते, सा नूनं पूर्वोक्त–ग्रहामाधारेण वर्णिताः सन्ति। यथा अद्यापि चिकित्साक्षेत्रे रविचन्द्रोः प्रभावः,

यान्त्रिकीक्षेत्रे भौमस्य प्रभाव:, काव्यरचनादिकार्ये बुधस्य प्रभाव: स्वयमेव दृश्यते अग्रे स्वयमेव विद्वांस: विचारयन्ति यत् कुत्र का च वृत्ति: जातकस्य कृते उनमा इति।

इदानीं वैज्ञानिकुयगे नूनं बालकाले वृतिनिर्माण सम्बन्धितानि इयं प्रतिव्या अतीव महत्वपूर्णा चमत्कारिकी च वर्तते, यया सम्यक् निर्माणपूर्वकं जातकस्य विकासाय प्रयतमाना दृश्यते। उक्तं च ज्योतिषे–

**शुभफलनददशायां तादृगेवान्तरात्मा बुजनयति पुसां सौख्य–मर्थागमं च।**

**कथितफलविपाकैस्तर्कयेद्वर्तमानां परिणमति फलोक्ति: स्वप्त- चिन्तास्ववीर्यै:।।**

**निष्कर्ष**: - भृत्युसुखविचारस्य निष्कर्षमेव मया प्राप्यते यत्जातक: षष्ठेशे माने रवेशे मन्दुयते केन वासान्वित:, राज्ये शुभदृष्ट्याधिक्ये दासान्वित:, कर्मेशांशेशे मन्दे षष्ठसम्बन्धो बहुदारसान्वित:, नृपेर्के शुभकर्मपदृष्टे बहुदासान्वित:। अंशे मन्दे प्रसिद्धकर्माजीवी इत्यादय: योगा: वर्णिता: सन्ति।

**सन्दर्भ ग्रन्थ : -**


1. जातकतन्व:–3/45–46 ।
2. जातकतन्व:–347–48 ।
3. यजु.– 31/111
4. गीता.– 4/13 ।
5. गीता–18/411
6. मनु.–10/650
7. मनु. 1/91।
8. गीता 18/441
9. जातकपारिजातके।
10. जातकपद्धति:।
11. फलदी.।
12. फलदी.।
13. बृहज्जातकस्य–10/1 टीकायाम्।
14. जैमिनिसूत्रम् 1.2.14–20 ।